शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥"
इति भावप्रकाशः ॥

शाख्यः, त्रि, शाखासम्बन्धी । शाखाशब्दात् ण्यप्रत्ययेन निष्पन्नमेतत् ॥

शाङ्करं, क्ली, (शङ्कर + अण् ।) छन्दोभेदः । इति मेदिनी ॥ अस्य रूपान्तरं शाक्करं शार्क्करञ्च ॥ (शङ्करी देवतास्य इत्यर्थे अणि आर्द्रानक्षत्रम् । यथा, बृहत्संहितायाम् । ७१ । ७ ।
"मृगे तु मूषकाद्भयं व्यसुत्वमेव शाङ्करे ॥")

शाङ्करः, पुं, (शङ्करस्यायं वाहनत्वात् । शङ्कर + अण् । ) बलीवर्दः । इति मेदिनी ॥ (शङ्करसम्बन्धिनि, त्रि । यथा, कथासरित्सागरे । ४६ । २०१ ।
"तवैषां तद्गुणाहारप्रासानां शाङ्करा गणाः ॥")

शाङ्करिः, पुं, शङ्करस्यापत्यं पुमान् । शङ्कर + इञ् ।) कार्त्तिकेयः । गणेशः । इति मेदिनी ॥

शाङ्कुची, स्त्री, शङ्कोचनमत्स्यः । इति शब्दरत्नावली ॥

शाङ्खः, त्रि, शङ्खसम्बन्धि । शङ्खशब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ॥

शाङ्खिकः, पुं, (शङ्खकरणं शिल्पमस्य इति । शङ्ख + ठक् ।) जातिविशेषः । शाँखारि इति भाषा । तत्पर्य्यायः । काम्बविकः २ । इत्यमरः ॥ शङ्खकारः ३ काम्बजकः ४ । इति शब्दरत्नावली ॥ शङ्खवादकः । तत्पर्य्यायः । शङ्खध्माः २ । इति जटाधरः ॥

शाकुष्ठा, स्त्री, गुञ्जा । इति रत्नमाला ॥

शाटः, पुं, वस्त्रभेदः । इत्यमरभरतौ ॥ यथा,—
"दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
इति चाणक्यशतकम् ॥

शाटकः, पुं क्ली, (शाट + स्वार्थे कन् । ) पटः । (यथा, कथासरित्सागरे । ५३ । ३८ ।
"स राजवन्दिनामा तद्दत्त्वा शाटकमग्रहीत् ॥")
नाटकभेदः । इत्यमरभरतौ ॥

शाटिका, स्त्री, शाटी । इत्यमरटीकायां भरतः ॥

शाटी, पुं स्त्री, वस्त्रभेदः । शाड़ी इति भाषा । इत्यमरः ॥ अस्या निर्माल्यत्वं निर्माल्यशब्दे द्रष्टव्यम् ॥

शाट्यायनं, क्ली, प्रकृतकर्म्मवैगुण्यप्रशमनार्थहोमः । यथा । यत्तु प्रकृतकर्म्मवैगुण्यप्रशमनाय शाट्यायनहोमाभिधानं भवदेवभट्टसम्मतं तन्न प्रामाणिकं तस्मादपि महाप्रामाणिकैर्भट्टनारायणचरणैर्गोभिलभाष्ये तदप्रमाणीकृतत्वात् । छन्दोगपरिशिष्टेऽपि प्रायश्चित्तार्थं प्रकारत्रयमात्रमुक्तम् । यथा,—
"यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र विज्ञेया स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥"

त्रिविकल्प इत्यनेन कल्पान्तरनिषेधात् गोभिलीयकर्म्मणि शाट्यायनहोमो न युक्तः । किन्तु व्यस्तसमस्तमहाव्याहृतिभिस्तसृभिः प्रायश्चित्तहोमो युक्तः । विशारदप्रभृतयोऽप्येवम् । शाट्यायनहोमस्य समूलत्वेऽपि शाख्यन्तरीयत्वम् । इति तिथ्यादितत्त्वम् ॥

शाट्यायनः, पुं, मुनिविशेषः । इति पुराणम् ॥

शाठ्यं, क्ली, ( शठस्य भावः । शठ + ष्यञ् । ) शठता । (यथा । "शठे शाठ्यं समाचरेत् ॥") तत्पर्य्यायः । कपटः २ व्याजः ३ दम्भः ४ उपधिः ५ छद्म ६ कैतवम् ७ कुसृतिः ८ निकृतिः ९ । इत्यमरः ॥ नव अयथार्थव्यवहारे । शठ वधे क्लेशकैतवे तालव्यादिः अल् तस्य कर्म्म शाठ्यं ष्यञ् । कपटादिषट्कं छद्मनि कुसृत्यादित्रयं चित्तकौटिल्ये इत्येके । कपटादिषट्कं वञ्चनमात्रफलम् । कुसृत्यादित्रिकन्तु हिंसाफलमिति भेदः । इति सर्व्वानन्दो मधुश्च । नवैकार्था इति बहवः । इति भरतः ॥ अपि च ।
"अस्त्रियां कपटो व्याज उपधिर्दम्भ एव च ।
कूटं कल्कं छलं छद्म मिथःकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा ।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः ॥
पूर्व्वः कपटपर्य्यायः फले वञ्चनमात्रके ।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥

शाड, ऋ ङ श्लाघे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अशशाडत् । ङ, शाडते गुणिनं गुणी । अन्तःस्थतृतीययुक्तादिरयमिति कस्यचिद्भ्रमः । इति दुर्गादासः ॥

शाड्वलः, पुं, शाद्वलः । इति केचित् ॥

शाणं, क्ली, (शणेन निर्म्मितमिति । शण + अण् ।) शणनिर्म्मितवस्त्रम् । यथा । "क्षौमं शाणं वा ब्राह्मणस्य कार्पासं क्षत्त्रियस्य आविकं वैश्यस्य । क्षुमा अतसी तस्या इदं क्षौमं तसरादि । शाणं शणतन्तुभवं तदुभयं ब्राह्मणस्य । इति संस्कारतत्त्वम् ॥

शाणः, पुं, ( शश्यते श्रायते गुणादिरनेनेति । शण + घञ् ।) कषपट्टिका । कष्टिपातर इति भाषा । तत्पर्य्यायः । निकषः २ कषः ३ । इत्यमरः ॥ शानः ४ निकसः ५ कसः ६ । इति भरतः ॥ आकषः ७ । इति शब्दरत्नावली ॥ माषचतुष्टयम् । चारि मापा इति भाषा ॥ तत्पर्य्यायः । निष्कः २ टङ्कः ३ । इति वैद्यकपरिभाषा । यथा,—
"माषैश्चतुर्भिः शाणः स्यात् धरणः स निगद्यते ।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ॥"
इति भावप्रकाशः ॥
लौहादीनां निकषः । शानपातरः इति भाषा । इति मेदिनी ॥ करपत्रम् । करात् इति भाषा । इति विश्वः ॥

शाणाजीवः, पुं, (शाणेन आजीवतीति । आ + जीव + अच् ।) अस्त्रमार्ज्जकः । यथा,—
"शाणाजीवः शस्त्रमार्ज्जो भ्रमासक्तोऽसिधावकः ॥"
इति हेमचन्द्रः ॥

शाणिः, पुं, पट्टहस्तः । यथा,—
"पट्टे राजगणः शाणिश्चिभिः ककुखटपत्रकः ॥"
इति शब्दमाला ॥

शाणितः, त्रि, तीक्ष्णीकृतः । निशितः । कृतशाणः शाणशब्दादितप्रत्ययेन निष्पन्नमेतत् ॥

शाणी, स्त्री, (शणस्य विकारः । शण + अण् । टिड्ढेति ङीप् । ) शणसूत्रमयी पट्टिका । यथा, –
"शाणीप्रायाणि वस्त्राणि शमीप्राया महीरुहाः ।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥"
इति विष्णुपुराणे ६ अंशे १ अध्यायः ॥
शाणी शणसूत्रमयी पट्टिका तत्तुल्यानि वस्त्राणि । इति तट्टीका ॥ (यथा, महाभारते । ३ । १८४ । १८ ।
"वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः ॥")
प्रावरणान्तरम् । ताम्बु इति भाषा । इति मेदिनी ॥ छिद्रवस्त्रम् । यथा । शाणी गोणी छिद्रवस्त्रे । इति हेमचन्द्रः ॥ हस्तकटाक्षादिसूचना । इशारा इति पारस्यभाषा । इति शब्दरत्नावली ॥

शाणीरं, क्ली, शोणनदमध्यस्थतटः । दर्दरीनदीतटः । इति विश्वः ॥

शाण्डिल्यः, पुं, विल्ववृक्षः । इत्यमरः ॥ (यथा, महागणपतिस्तोत्रे । ९ ।
"ईशानं प्रणमामि यस्य पुरतः शाण्डिल्यमूले श्रिया बिभ्रत्याम्बुरुहे समं मधुरिपुस्ते शङ्खचक्रे वहन् ॥")
वह्निभेदः । (शण्डिलस्य मुनेर्गोत्रापत्यमिति । शण्डिल + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् । ) मुनिविशेषः । इति मेदिनी ॥ स तु गोत्रकारः भक्तिसूत्रकारश्च । तत्सूत्रभाष्याद्यश्लोको यथा,—
"प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥"

शातं, क्ली, ( शो + क्तः "शाच्छोरन्यतरस्याम् ।" ७ । ४ । ४१ । इति पक्षे इत्वाभावः । ) सुखम् । तद्वति, त्रि । इत्यमरः ॥ (विनाशः । यथा, सुश्रुते । ४ । १ ।
"पाणिप्रासं पाणिदाहं नखशातं करोति च ॥")

शातः त्रि, ( शो + क्तः दुर्बलः । ) निशितः । इति मेदिनी ॥ धुस्तूरः इत्यमरः ॥

शातकुम्भं, क्ली, ( शतकुम्भे पर्व्वते भवम् । शतकुम्भ + अण् । ) काञ्चनम् । (यथा, माघे । ९ । ८ ।